**शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः**

**वार्षिकम्–अभ्यासप्रश्नपत्रम्– 2025-26**

**कक्षा- सप्तमी संस्कृतम्**

**समयः – 2.30 घण्टाः** **पूर्णाङ्कः – 60**

**सामान्य-निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः।

उत्तराणि संस्कृतेनैव लेखनीयानि।

प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| • खण्ड 'क' | अपठित-अवबोधनम् | 8 अंकाः |
| • खण्ड 'ख' | रचनात्मक–कार्यम् | 12 अंकाः |
| • खण्ड 'ग' | अनुप्रयुक्त-व्याकरणम् | 18 अंकाः |
| • खण्ड 'घ' | पठित-अवबोधनम् | 22 अंकाः |

**खण्ड-क**

**अपठितांश-अवबोधनम्** 8 अङ्काः

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

महात्मागान्धिनः सम्पूर्णनाम मोहनदासः करमचन्द-गान्धी आसीत्। अस्य जन्म गुजरातस्य पोरबन्दर-नामके नगरे अभवत्। अस्य पिता श्रीकरमचन्दगान्धी राजकोटस्थाने 'दीवान' इति पदे प्रतिष्ठितः आसीत्। गान्धिनः माता श्रीमती पुतलीबाई आसीत्। विद्याभ्यास-समये मोहनदासः साधारणबालकः आसीत्। सः विनयशीलः लज्जालुस्वभावकः च आसीत्। अनन्तरं सः स्वजीवने सत्यम् अहिंसां च प्रतिष्ठापयितुं द्रढव्रतः अभवत्। तस्य उदारान् गुणान् दृष्ट्वा कविः रविन्द्रनाथः ठाकुरः तं 'महात्मा' इति शब्देन सम्बोधितवान्।

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नत्रयम्)** **3x1=3**

i.) महात्मागान्धिनः पिता कस्मिन् पदे प्रतिष्ठितः आसीत्?

ii.) महात्मागान्धिनः मातुः नाम किम् आसीत् ?

iii.) गान्धिनः जन्म कस्मिन् नगरे अभवत् ?

iv.) विद्याभ्याससमये गान्धी कीदृशः बालकः आसीत् ?

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नमेकम्) 1x2=2**

i.) महात्मागान्धिनः सम्पूर्णनाम किम् आसीत्?

ii.) गान्धिनं 'महात्मा' इति शब्देन कः सम्बोधितवान् ?

**इ) यथानिर्देशम् उत्तरत – (केवल प्रश्नद्वयम्) 2x1=2**

i.) अधोलिखितेषु कर्तृपदं किम् ?

क) मोहनदासः ख)) नगरे ग) दृष्ट्वा घ) च

ii.) (ख) अधोलिखितेषु सर्वनामपदं किम् ?

क) सः ख) च ग) अपिघ) इति ङ) ङ

iii.) 'सत्यम्' इत्यस्य विलोमपदम् अत्र किम्?

क) तस्य ख) च ग) असत्यम् घ) इति

iv.) अधोलिखितेषु कविः कः अस्ति?

क) मोहनदासः ख) करमचन्दः ग) गान्धी घ) रविन्द्रनाथः

**ई) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1x1=1**

**खण्डः–ख : रचनात्मकं कार्यम् (12 अङ्काः)**

प्र. 2 **चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पदानि चित्वा चत्वारि वाक्यानि लिखत – 4x2=8**



त,

**मञ्जूषा**

**अथवा**

**'मम पुस्तकालयः'** विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत।

**प्र.3 पदानां मेलनं कृत्वा वाक्य रचनां कुरुत-** **4x1=4**

| | | | |
|---|---|---|---|
| (i) | युवां | पत्रं | करोति |
| (ii) | मित्रं | गृहकार्यं | स्मरतः |
| (iii) | छात्रौ | श्लोकं | गायथः |
| (iv) | माता | गीतं | लिखति |

**खण्ड-ग** **अनुप्रयुक्त-व्याकरणम्** **18 अङ्काः**

**प्र.4 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत (केवलं प्रश्नत्रयम्) 3x1=3**

**i.)** न+अस्त्युद्यमसमो ................................. बन्धुः।
**ii.)** चटकावदत् ..................+.................. दुष्टेनैकेन गजेन मम सन्ततिः नाशिता।
**iii.)** कामपि महिलां कार्य+अर्थं .................................... जानासि तर्हि प्रेषय।
**iv.)** प्रियं च न+ अनृतं .................................... ब्रूयात्।

**प्र. 5 अधोलिखितं प्रकृतिप्रत्ययं संयुज्य वियुज्य वा पदानि सृजत (केवलं प्रश्नत्रयम्) 4x1=4**

**i.)** प्रति+ ईक्षते = ....................................
**ii.)** प्रस्थितः.................+.................
**iii.)** विचारः...............+.....................
**iv.)** अनु+सृत्य ....................................
**v.)** विभूषिता ....................................

**प्र.6 उचितक्रियापदेन रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्)** **4x1=4**

i.) पद्भ्यां समग्रं भारतम् ............(भ्रम्+लङ्) ........................ ।
ii.) तस्मिन्नेव गर्ते ............(पत्+लृट्) ........................।
iii.) क्रुद्धः कूर्मः ............(वद्+लङ्) ........................।
iv.) बालिका ............(स्था+लट्) ........................।

**प्र. 7 कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नचतुष्टयम्) 4x1=4**

i.) ........................ परितः वृक्षाः सन्ति। (ग्राम)
ii.) ........................ उभयतः नदी अस्ति। (देवालय)
iii.) ........................ नमः। (गुरु)

iv.) ……………………उपरि खगाः सन्ति। (वृक्ष)

v.) …………………… उपरि सैनिकाः सन्ति। (वाहन)

**प्र.8 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्) 3x1=3**

i.) रमेशः ……………………………… गच्छति। (भोजनालयः/ भोजनालयं / भोजनालयेन)

ii.) बालिका ……………………………… गीतं लिखति। ( हस्तं/ हस्तेन/ हस्तः)

iii.) क्रुद्धः ………………………………अवदत्। कूर्मः/ कूर्मं/ कूर्मेण

**खण्ड-घ पठित-अवबोधनम् 22 अंका:**

**प्र.9 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत- 5**

स्त्रीशिक्षाक्षेत्रे अग्रगण्या पण्डिता रमाबाई 1858 ई. तमे ख्रिष्टाब्दे जन्म अलभत। तस्याः पिता अनन्तशास्त्री डोंगरे माता च लक्ष्मीबाई आस्ताम्। तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत्। स्त्रीणां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत् किन्तु डोंगरे रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध्यापयत्। एतदर्थं सः समाजस्य प्रतारणाम् अपि असहत। अनन्तरं रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1**

i.) स्त्रीशिक्षाक्षेत्रे अग्रगण्या का 1858 तमे खिष्टाब्दे जन्म अलभत?

ii.) तदा स्त्रीणां कृते कि प्रचलितं नासीत्?

ब)**पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i.) रमायाः मातापित्रोः नाम किम् ?

ii.) रमा कस्याः संस्कृतशिक्षां प्राप्तवती?

स) **यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 2x1= 2**

i) "सः समाजस्य प्रतारणाम् अपि असहत।" अस्मिन् वाक्ये अव्ययपदं किम्**?**

क) सः ख) समाजस्य ग) अपि

ii) रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती" अस्मिन् वाक्ये क्रियापदं किम्**?**

क) रमा ख) प्राप्तवती ग) स्वमातुः

iii) "एतदर्थं सः समाजस्य प्रतारणाम् अपि असहत" अस्मिन् वाक्ये कर्तृपदं किम्**?**

क)) सः ख) प्रतारणाम् ग) अपि

**प्र.10 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत- 5**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1**

i.) पृथिव्यां कति रत्नानि?

ii.) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

**आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i.) पृथिव्यां कानि रत्नानि?

ii.) मूढैः केषु रत्नसंज्ञा विधीयते?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 2x1= 2**

i.) 'मूर्खैः' इति पदस्य समानार्थकं पदं किम्?

क) मूढैः ख) मनुजैः ग) रत्नैः

ii.) 'त्रीणि' इति कस्य पदस्य विशेषणम् ?

क) रत्नानि ख) मूर्खैः ग) खण्डेषु

iii.) 'मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते' अस्मिन् वाक्ये क्रियापदं किम्?

क) मूढैः ख) विधीयते ग) रत्नसंज्ञा

**प्र.11 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत– 5**

देवेशः– अद्य स्वतन्त्रता-दिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिक कार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति।

डेविडः– शुचे! जानासि त्वम् ? अस्माकं ध्वजः कीदृशः?

शुचिः- अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः– रूचे! अयं त्रिवर्णः कथम्?

रूचिः- अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि ?

सलीमः- अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

सलीमः श्रृणु, केशरवर्णः, शौर्यस्य, श्वेतः, सत्यस्य, हरितश्च, समृद्धेः सूचकाः सन्ति।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1 = 1**

i.) विद्यालयस्य प्राचार्यः किं करिष्यति?

ii.) अस्माकं ध्वजे कति वर्णाः सन्ति?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i.) देशस्य ध्वजः त्रिवर्णः कथम्?

ii.) त्रयः वर्णाः कस्यसूचकाः सन्ति

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 2x1 = 2**

i.) 'वीरतायाः' अस्मिन् अर्थे किं पर्यायपदं प्रयुक्तम्?

क) शौर्यस्य ख) सत्यस्य ग) हरितस्य

ii.) 'अस्मिन् ध्वजे त्रयः वर्णाः सन्ति' अस्मिन् वाक्ये क्रियापदं किम्?

क) अस्मिन्　　ख) ध्वजे　　ग) सन्ति

iii.) अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः। अस्मिन् वाक्ये किम् अव्ययपदम्?

क) हरितः　　ख) श्वेतः　　ग) च

**12. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितस्य श्लोकस्य अन्वयं पूरयत–　　3x1= 3**

**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् । प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः॥**

**अन्वयः**– सत्यं …………………….. प्रियं ब्रूयात्। अप्रियं …………………….. न ब्रूयात्। ……………………..च अनृतं न ब्रूयात्। एषः धर्मः सनातनः॥

**मञ्जूषा**

| प्रियं , ब्रूयात्, सत्यं, |
| --- |

**प्र. 13 प्रश्नपत्रात् अतिरिच्य स्वपाठ्यपुस्तकात् स्मरणाधारेण किमपि श्लोकद्वयं संस्कृतेन लिखत।　　2x2=4**